सत्वरः क्रोशविस्तारं बहुगुल्मलताकुलम् ।
मनोज्ञं रमणीयञ्च जलजैश्चापि संवृतम् ॥
तत्र मूढ़ाब्जिपद्मानि द्योतयन्ति दिशो दश ।
एकन्तु दृश्यते श्वेतमेकं रुक्ममयं तथा ॥
तत्र ब्रह्मसरं नाम गुह्यं क्षेत्रे परं मम ।
उत्तरेण तु पार्श्वेन मम क्षेत्रस्य सुन्दरि ॥
तत्र कुण्डं महाभागे पर्व्वते च समाश्रितम् ।
धारा यत्र पतत्येव स्थूला मुषलसन्निभा ॥
तत्र स्नानञ्च कुर्व्वीत षष्ठकालोषितो नरः ।
ब्रह्मलोकं समासाद्य मोदते नात्र संशयः ॥
अथ प्राणान् प्रमुञ्चेत तत्र ब्रह्मसरे मम ।
ब्रह्मणा समनुज्ञातो मम लोकञ्च गच्छति ॥
तत्राश्चर्य्यं महाभागे रम्ये ब्रह्मसरे शृणु ।
मन्नरा यानि पश्यन्ति घोरं संसारमोक्षणम् ॥
चतुर्व्विंशतिद्वादश्यां सा धारा दृश्यते शुभे ।
मध्याह्ने पतते भूमिं यावत् सूर्य्यः स तिष्ठति ॥
परावृत्ते तु मध्याह्ने सा धारा न पतेद्भुवि ।
एवं तत्र महाश्चर्य्यं पुण्ये ब्रह्मसरे मम ॥"
इति वाराहे सानन्दूरमाहात्म्यनामाध्यायः ॥)

सानसिः,पुं, (सन्यते दीयते दक्षिणाद्यर्थमिति । षणु दाने + "सानसिवर्णसीति ।" उणा० ४ । १०७ । इति असिप्रत्ययेन साधुः ।) सुवर्णं । इत्युणादिकोषः ॥ (संभजनीये, त्रि । यथा, ऋग्वेदे । १० । १४० । ४ ।
"पृणक्षि सानसिं क्रतुम् ॥"
"सानसिं संभजनीयं क्रतुं कर्म्म पृणक्षि अस्माभिः संपर्चयसि फलेन वा संयोजयसि ॥" इति तद्भाष्ये सायणः ॥)

सानिका,स्त्री,(सनति सुस्वरमिति । षणुदाने + ण्वुल् । टापि अत इत्वम् ।) वंशी । इति शब्दरत्नावली ॥

सानुः,पुं,क्ली,(सन्यते सेव्यते मुनिप्रभृतिभिरिति सन सेवायाम् + "दृसनिजनीति ।" उणा० १ । ३ । इति ञुण् ।)पर्व्वतसमभूभागः । तत्पर्य्यायः । स्नुः २ प्रस्थः ३ । इत्यमरः । २।३।५ ॥ (यथा, रामायणे । २ । ३१ । २७ ।
"भवांस्तु सह वैदेह्या गिरिसानुषु रंस्यते ।
अहं सर्व्वं करिष्यामि जाग्रतः स्वपतश्च ते ॥")
वनम् । वात्या । मार्गः । अग्रम् । कोविदः । इति मेदिनी ॥ अर्कः । पल्लवः । इति जटाधरः ॥

सानुजं, क्ली, (सानौ जायते इति । जन् + डः ।) प्रपौण्डरीकम् । इति राजनिर्घण्टः ॥

सानुजः, पुं, (सानौ पर्व्वतप्रस्थे जायते इति । जन + डः ।) तुम्बुरुवृक्षः । इति राजनिर्घण्टः ॥ अनुजेन सह वर्त्तमाने सानुजाते च त्रि ॥

सानुमान्, [त्] पुं, (सानुर्व्विद्यतेऽस्येति । सानु + मतुप् ।) पर्व्वतः । इति हेमचन्द्रः ॥ (यथा, रघुः । ८ । ९० ।
"न पृथग्जनवच्छुचो वशं
वशिनामुत्तम ! गन्तुमर्हसि ।
द्रुमसानुमतां किमन्तरं
यदि वायौ द्वितयेऽपि ते चलाः ॥"
वाच्यलिङ्गेऽपि दृश्यते । यथा, रामायणे । २ । ४८ । १० ।
"आपगाश्च महानूपाः सानुमन्तश्च पर्व्वताः ॥")

सानेयिका,स्त्री, (सानेयी + स्वार्थे कन् ।)वंशी । इति शब्दरत्नावली ॥

सानेयी, स्त्री, वंशी । इति शब्दरत्नावली ॥

सान्तपनं,क्ली,(सन्तपतीति । सम् + तप + ल्युः । ततः स्वार्थे अण् ।) व्रतविशेषः । इत्यमरः । २ । ७ । ५२ ॥ यथा,—
"गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ।
एकरात्रोपवासश्च कृच्छ्रं सान्तपनं स्मृतम् ॥"
इति मानवे ११ अध्यायः ॥
गोमूत्रमिति । गोमूत्रादि एकीकृत्य एकस्मिन्नहनि भक्षयेत् नान्यत् किञ्चिदद्यात् अपरदिने चोपवासः । इत्येतत् सान्तपनं कृच्छ्रं स्मृतम् । यदा तु गोमूत्रादिषट् प्रत्येकं षड्दिनानुप्रभुज्यते सप्तमे दिने चोपवासः तदा महासान्तपनं भवति । तथा च याज्ञवल्क्यः ।
"कुशोदकञ्च गोक्षीरं दधि मूत्रं शकृद् घृतम्
जग्ध्वा परेऽह्न्युपवसेत् कृच्छ्रं सान्तपनञ्चरन् ॥
पृथक्सान्तपनद्रव्यैः षडहः सोपवासिकः ।
सप्ताहेन तु कृच्छ्रोऽयं महासान्तपनं स्मृतम् ॥"
इति कुल्लूकभट्टः ॥
गारुड़े १०५ अध्यायेऽप्येवम् ॥ (सन्तापके, त्रि ॥ यथा, ऋग्वेदे । ७ । ५९ । ९ ।
"सान्तपना इदं हविर्मरुतस्तज्जुजुष्टन ॥"
"सान्तपनाः शत्रूणां संतापका हे मरुतः ॥" इति तद्भाष्ये सायणः ॥ सन्तपनस्य सूर्य्यस्येदमिति । अण् । सूर्य्यसम्बन्धिनि च त्रि । यथा, वाजसनेयसंहितायाम् । १७ । ८५ ।
"स्वतवांश्च प्रघासी च सान्तपनश्च गृहमेधी च ।"
'सन्तपनः सूर्य्यस्तत्सम्बन्धी सान्तपनः ।' इति तद्भाष्यम् ॥)

सान्तरं, त्रि, विरलम् । इति जटाधरः ॥ (यथा, बृहत्संहितायाम् । २२ । ३ ।
"यदि ताः स्युरेकरूपाः
शुभास्ततः सान्तरास्तु न शिवाय ॥")
अन्तरेण सह वर्त्तमानञ्च ॥ (सावकाशम् । यथा, महाभारते । ७ । ११ । १८ ।
"तस्य जिह्ममभिप्रायं ज्ञात्वा द्रोणोऽथ तत्त्ववित् ।
तं वरं सान्तरं तस्मै ददौ संचिन्त्य बुद्धिमान् ॥")

सान्त्व,क सामप्रयोगे । इति कविकल्पद्रुमः ॥(चुरा०-पर०-सक०-सेट् ।) क, सान्त्वयति शोकार्त्तं दयालुः । इति दुर्गादासः ॥

सान्त्व, त् क सान्त्वने । इति कविकल्पद्रुमः ॥ (अदन्तचुरा०-पर०-सक०-सेट् ।) दन्त्यादिस्तमध्यः वकारोपधः । सान्त्वनं प्रियकरणम् । सान्त्वयति सान्त्वापयति । इति दुर्गादासः ॥

सान्त्वं, क्ली, (सान्त्व सान्त्वने + घञ् ।) अत्यर्थमधुरम् । तत्तु कर्णमनःप्रीतिजनकं वाक्यम् । (यथा, महाभारते । ५ । १४० । २ ।
"कानि सान्त्वानि गोविन्दः सूतपुत्त्रे प्रयुक्तवान् ॥")
साम । तच्च प्रियवादार्थप्रदानसम्बन्धादिभिः क्रोधोपशमनम् । इत्यमरभरतौ ॥ (यथा, माघे । २ । ५४ ।
"चतुर्थोपायसाध्ये तु रिपौ सान्त्वमपक्रिया ।
स्वेद्यमामज्वरं प्राज्ञः कोऽम्भसा परिषिञ्चति ॥")
दाक्षिण्यम् । इति मेदिनी ॥

सान्त्वनं, क्ली, (सान्त्व + ल्युट् ।) सामोपायः । इति हेमचन्द्रः ॥ प्रियकरणम् । इति सान्त्वधातुटीकायां दुर्गादासः ॥ (यथा, महाभारते । २ । ३८ । ६ ।
"नास्मै देयो ह्ययमर्हति सान्त्वनम् ।
लोकवृत्ततमे कृष्णे योऽर्हनां नाभिमन्यते ॥")

सान्त्वना,स्त्री,क्ली,सान्त्व + युच् । टाप् । क्लीबपक्षे ल्युट् ।) सान्त्वनम् । प्रणयः । यथा । "प्रणयः सान्त्वना न मा ।" इति जटाधरः ॥

सान्त्ववादः, त्रि, (सान्त्वस्य साम्नः वादः कथनम् ।) सान्त्वनावाक्यम् । इति केचित् ॥

सान्दीपनिः,पुं,(सन्दीपनस्यापत्यमिति । सन्दीपन + इञ् ।) मुनिविशेषः । यथा, ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे । ९८ । ३० ।
"विश्वामित्रः शतानन्दो जाजलिस्तैतिलिस्तथा
सान्दीपनिश्च ब्रह्मांशो योगिनां ज्ञानिनां गुरुः ॥"
अपि च ।
"विदिताखिलविज्ञानौ तत्त्वज्ञानमयावपि ।
शिष्याचार्य्यक्रमं वीरौ ख्यापयन्तौ यदूत्तमौ ॥
ततः सान्दीपनिं काश्यमवन्तिपुरवासिनम् ।
अस्त्रार्थं जग्मतुर्व्वीरौ बलदेवजनार्द्दनौ ॥"
काश्यं काश्यां जातम् ।
"तस्य शिष्यत्वमभ्येत्य गुरुवृत्तिपरौ हि तौ ।
दर्शयाञ्चक्रतुर्व्वीरावाचारमखिले जने ॥
सरहस्यं धनुर्व्वेदं ससंग्रहमधीयताम् ।
अहोरात्रैश्चतुःषष्ट्या तदद्भुतमभूद्द्विज ॥
सान्दीपनिरसंभाव्यं तयोः कर्म्मातिमानुषम् ।
विचिन्त्य तौ तदा मेने प्राप्तौ चन्द्रदिवाकरौ ॥
अस्त्रग्राममशेषञ्च प्रोक्तमात्रमवाप्य तौ ।
ऊचतुर्व्रियतां या ते दातव्या गुरुदक्षिणा ॥
सोऽप्यतीन्द्रियमालोक्य तयोः कर्म्म महामतिः
अयाचत मृतं पुत्त्रं प्रभासे लवणार्णवे ॥"
अतीन्द्रियं अन्यत्रादृष्टपूर्व्वम् ।
"गृहीतार्घ्यौ ततस्तौ तु सार्वपाणो महोदधिः
उवाच न मया पुत्त्रो हृतः सान्दीपनेरिति ॥
दैत्यः पञ्चजनो नाम शङ्खरूपः स बालकम् ।
जग्राह सोऽस्ति सलिले ममैवारिनिसूदन ॥
इत्युक्तोऽन्तर्जलं गत्वा हत्वा पञ्चजनञ्च तम् ।
कृष्णो जग्राह तस्यास्थिप्रभवं शङ्खमुत्तमम् ॥
यं पाञ्चजन्यमापूर्य्य गत्वा यमपुरीं हरिः ।
बलदेवश्च बलवान् जित्वा वैवस्वतं यमम् ॥
तं बालं यातनासंस्थं यथापूर्व्वशरीरिणम् ।
पित्रे प्रदत्तवान् कृष्णो बलश्च बलिनां वरः ॥"
इति विष्णुपुराणे । ५ । २१ । १८ । ३० ॥